# হেরম্বোপস্থানম্

{॥ হেরম্বোপস্থানম্ ॥}

প্রথমঃ খণ্ডঃ (শশিবদনাবৃত্তম্)

শ্রিয়মসমানাং মম শুভনামা ।

দিশতু গণানাং পতিরতিধামা ॥ ১॥

বিজিতজরাধিং বিনিহতরোগম্ ।

দ্বিরদমুখো মে বিতরতু যোগম্ ॥ ২॥

বিতরতু মহ্যং নিজপদভক্ত্তিম্ ।

গণপতিরগ্রয়ামপি ভুজশক্ত্তিম্ ॥ ৩॥

হরতনযো মে বিভুরতিহৃদ্যম্ ।

বিতরতু ভূতপ্রবিমলবিদ্যাম্ ॥ ৪॥

মম করিবক্ত্রঃ প্রভুরনবদ্যাম্ ।

দিশতু ভবিষ্যদ্বিদমুডুবিদ্যাম্ ॥ ৫॥

নিজবিষযাজিষ্বঘহিমভানো ।

ইমমবিজেযং কুরু হরসূনো ॥ ৬॥

সুমধুরমাধ্বীধরপদজাতম্ ।
করিমুখ দাসং কুরু কবিমেতত্ ॥ ৭॥

গণপতিরূপং মনসি করোমি ।
গণপতিকির্তীং বচসি তনোমি ॥ ৮॥

মম গণনাথঃ শময়তু পাপম্ ।
সপদি বিমুষ্ণাত্বপি পরশাপম্ ॥ ৯॥

শশিবদনানাং নবকৃতিরেষা ।
ভজতু গণেশং পতিমিব যোষা ॥ ১০॥

দ্বিতীয়ঃ খণ্ডঃ (মদলেখাবৃত্তম্)
আহ প্রাজ্ঞজনস্ত্বাং মূলাধারনিশান্তম্ ।
মন্দে সুপ্তমিভাস্য জ্ঞে যুক্তে বিলসন্তম্ ॥ ১১॥

অস্তি ব্যোম্নি গুরুর্যস্তস্যৈব ত্বমিহাসি ।
বিঘ্নেশানবিবর্তঃ সদ্ভক্তেষু বিভাসি ॥ ১২॥

কোঽপি প্রাভবশালী মূলাধারবিহারী ।
প্রজ্ঞাসিদ্ধিবধূভ্যাং শ্লিষ্টো ভাত্যঘহারী ॥ ১৩॥

আশা মে তব শক্ত্তিং দেহে দ্রষ্টুমপারাম্ ।
পাতুং চেশ্বরসূনো মূর্ধন্যামৃতধারাম্ ॥ ১৪॥

যা চিত্ সা তব মাতা যঃ শ্রেষ্ঠঃ স পিতা তে ।
সিদ্ধিৰ্বাহ্যমতির্যে তে নাথ প্রমদে তে ॥ ১৫॥

যা লিপ্সা হৃদযে মে তাং পূর্ণাং কুরু মা বা ।
এষাঙ্গীক্রিযতাং মে মত্তেভানন সেবা ॥ ১৬॥

না খে যাতি সুরো বা ত্বং চেত্ কিঞ্চিদুদাস্যম্ ।
আধারে বিদধাসি স্কন্দস্যাগ্রজ লাস্যম্ ॥ ১৭॥

ন স্বার্থে মম যত্নো নিঃস্বার্থে মম সোঽযম্ ।
উদ্যোগঃ শিবসূনো সদ্যো দেহি সহাযম্ ॥ ১৮॥

মাহাত্ম্যং ননু বক্ত্তুং কঃ শক্ত্তঃ পুরুষস্তে ।
হস্তীন্দ্রানন ভাগ্যং সর্বেষাং তব হস্তে ॥ ১৯॥

এতঃ সম্মদকর্ত্রীৰ্হৈরম্বীর্মদলেখাঃ ।
সেবন্তাং কবিভৃঙ্গাশ্চান্দ্রীর্ভা ইব লেখাঃ ॥ ২০॥

তৃতীয খণ্ডঃ (ইন্দ্রবজ্রাবৃত্তম্)

একাদশানাং প্রবরং সুতানাং রুদ্রস্য মন্ত্রধিপতিং নমামি ।

শাস্ত্রাণি সর্বাণ্যপি যস্য কীলাঃ সূর্যানপোহ্যং তিমিরং হরন্তি ॥ ২১॥

প্রাজ্ঞেন বুদ্ধযা যদকারি পদ্যং সধারণস্তত্র তবোপকারঃ ।

হেরম্ব যন্মন্ত্রমৃষিশ্চকার ব্যক্তোবিশিষ্টস্তব তত্র যত্র ॥ ২২॥

জিহ্বাস্থলং নাথ বিগাহমানং ত্বামাহুরুচ্ছিষ্টমযি ছলোক্ত্যা ।

উচ্ছিষ্টতা চেত্তব রুদ্রসূনো স্বাধ্যাযনিষ্ঠীবনতোর্ভিদা কা ॥ ২৩॥

সর্বাণি ধান্যানি চ ভক্ষযন্তং দন্তৈঃ শিতৈর্দেব সহাযবন্তম্ ।

এতং বিলস্থং রসনাহ্বযং তে বাহং বিদো মূষিকমামনন্তি ॥ ২৪॥

আধারচক্রে বসতো গণেশ জ্যোতির্মযাণোর্জ্বলতঃ সদাতে ।

একঃ পচত্যন্নমশেষমূষ্মা সম্প্রেরযন্ত্য ইমাস্তু বাচঃ ॥ ২৫॥

বৈশ্বানরোঽগ্নিঃ সকলস্য জীবো বাগিন্দ্রিযাগ্নিঃ শিবনন্দন ত্বম্ ।

যো বেদ নৈব যুবযোর্বিভেদং পিণ্ডেষু না মুহ্যতি স প্রসঙ্গে ॥ ২৬॥

ত্বাং ব্রহ্মণস্পত্যভিধানমাহুঃ কেচিদ্বিভোরীশপদস্য পুত্রম্ ।

অন্যৈর্বৃহস্পত্যভিধান উক্তো ধীরৈর্বিভোরিন্দ্রপদস্য মন্ত্রী ॥ ২৭॥

জিহ্বৈব বেদিস্তব তোযপূতা লোকপ্রসঙ্গস্তব তত্র ধূমঃ ।

জ্বালা জগন্নাথকথা পবিত্রা চেতো ঘৃতং জুহ্যতি যত্র সন্তঃ ॥ ২৮॥

বিদ্যুন্ময়ীমূর্তিরগাদি জিষ্ণোর্যা মৌনিভিঃ সৈব তব স্বরূপম্ ।

ইন্দ্রস্য ভেদস্তব চোদিতো যঃ স প্রাণবিদ্যুত্তনুভেদমূলঃ ॥ ২৯॥

দিব্যাগ্নিগাত্রং ধিষণা কলত্রং ভর্গস্য পুত্রং প্রণতস্য মিত্রম্ ।

দিব্যাগ্নিরুচো ভজন্তামেতাঃ করীন্দ্রাননমিন্দ্রবজ্রাঃ ॥ ৩০॥

চতুর্থঃ খণ্দঃ (বসন্ততিলকবৃত্তম্)

কিং বৃংহিতানি কুরুষে কলুষেণ ভগ্নে

মগ্নে মহাবিপদি দেব নিজে বিবর্তে ।

নিদ্রামি চেদ্বরদ বোধয হস্তঘাতা -

দ্গচ্ছামি চেদপথমাশু নিবর্তযস্ব ॥ ৩১॥

বেষস্ত্বাযমপরো যদি দেব নাট্য-

মারভ্যতাং তদ্ধচিত্তং কিমুপৈষি মৌনম্ ।

এতাং প্রভো যবনিকামপসারযন্তু

সক্ষাদ্গণাস্তব কুতঃ ক্রিযতে বিলম্বঃ ॥ ৩২ ॥

এতত্তমো নযনশক্ত্তিহরং গুহাযং

মর্গং রুণদ্ধি ন বিলোকিতুমস্মি শক্ত্তঃ ।

স্নেহোঽস্তি কাচন দশাস্তি বিভো কটাক্ষ-

জ্যোতির্লব সদয দেহি পুরো ব্রজেযম্ ॥ ৩৩॥

ঘোরং করোমি ন তপো যদি তেঽপরাধঃ

কিং প্রেরণং ন কৃতবানসি রুদ্রসূনো ।

সম্প্রেরিতশ্চ ভবতা যদি নাচরেযং

সম্প্রেরণস্য তব কা গজবক্ত্র শক্ত্তিঃ ॥ ৩৪ ॥

কার্যং ন মে কিমপি তত্ খলু নির্জরাণাং

রূপং ন মে কিমপি তত্তব কোঽপি বেষঃ ।

ইষ্টং নু কষ্টমথ কস্য করীন্দ্রবক্ত্র

শিষ্টং তু মে কিমপি নাম নরাঙ্গসঙ্গি ॥ ৩৫ ॥

নামাপি তত্তব ভবত্যথবা গজাস্য

চর্চা বিনশ্বরতমে তনুকঞ্চুকে কা ।

বিষ্ণোরিবেন্দুধবলং ভবিতা যশশ্চেত্

তদ্দন্তকান্তিষু তবৈব লযং প্রযাতু ॥ ৩৬॥

স্থূলাং তনূমসুমশেষমনোরথানাং

স্থানং মনশ্চ ধিষণাং প্রমদং চ মূলম্ ।

আক্রম্য কোশমখিলং চ বিভো খলারে

বিঘ্নাধিরাজ ময়ি দর্শয় তে বিভূতিম্ ॥ ৩৭॥

দেবী মতির্জলপত্রবিশালনেত্রা

দেবী চ সিদ্ধিরকলঙ্কসুধাকরাস্যা ।

ছয়োন্নতা চ দিননাথমিব জ্বলন্তং

নিত্যং ভবন্তমিভবক্ত্র বিভো ভজে তে ॥ ৩৮॥

সিদ্ধেন্দ্রবেষভৃতি ভূমিহিতায় রুদ্রে

কৈলাসশৈলমধিতিষ্ঠতি বজ্রপাণিঃ ।

ধৃত্বা গজেন্দ্রমুখবেষমমুষ্য পুত্রো

ভূত্বা বিভুর্নযতি পারিষদানশেষান্ ॥ ৩৯॥

সম্মোদয়ন্তু হৃদয়ং দ্বিরদাননস্য

দেবস্য সিদ্ধিধিষণা হৃদয়েশ্বরস্য ।

এতা বসন্ততিলকাঃ কবিকুঞ্জরেণ

গীতাঃ কয়াঽপ্যমলভাবনয়া যুতেন ॥ ৪০॥

॥ ইতি শ্রীভগবন্মহর্ষিরমণান্তেবাসিনো বাসিষ্ঠস্য

নরসিংহসূনোঃ গণপতেঃ কৃতির্হেরম্বোপস্থানং সমাপ্তম্ ॥

Encoded and proofread byDPD

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Herambopasthanam Lyrics in Bengali PDF
% File name : herambopasthAnam.itx
% Location : doc_ganesha
% Author : Ganapati Muni with Ramana Maharshi
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : DPD
% Proofread by : DPD
% Description-comments : From Complete Works of Ganapati Muni Vol 1
% Latest update : November 24, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website